PG / Sans / 3rd Sem / 21(CBCS)

2021

# SANSKRIT

Paper : SANS - 301

(CBCS)

Full Marks : 40 Time : Two Hours

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers*
*in their own words as far as practicable.*

## प्रथमार्धः

१• किं नाम वेदस्य लक्षणम् ? ऋग्वेदभाष्योपक्रमदिशा तत् विशद्यताम्।
(द्विशतशब्दमध्ये उत्तरं प्रदेयम्।) १०

अथवा,

मन्त्राणां विवक्षितार्थत्वम् अस्ति न वेति पठितग्रन्थमवलम्ब्य संक्षेपेण पर्यालोचनीयम्।
(द्विशतशब्दमध्ये उत्तरं प्रदेयम्।) १०

२• यथेच्छं **द्वयोः** सुरगिरा व्याख्येयम् (शतशब्दमध्ये उत्तरं प्रदेयम्।) - ३×२=६

क• ऊहः।

ख• बुद्धशास्त्रात्।

ग• वाक्यनियमात्।

घ• गुणार्थेन पुनः श्रुतिः।

३• यथेच्छं प्रश्न**द्वयं** संक्षेपेण सुरगिरा समाधेयम् (विंशतिशब्दमध्ये उत्तरं प्रदेयम्।) -
२×२=४

क• तदर्थशास्त्रात् इति सूत्रस्य कः आशयः?
ख• अर्थवादस्य किं तात्पर्यम्?
ग• वेदस्य को नाम अनुवन्धचतुष्टयः ?
घ• 'कर्मचोदना ब्राह्मणानि'- इति लक्षणं कुत्र प्राप्यते ?

## द्वितीयार्धः

४• अधोलिखितयोः प्रश्नयो**रेकस्योत्तरं** प्रदीयताम् (द्विशतशब्दमध्ये उत्तरं प्रदेयम्।) -
१०

क• 'निघण्टु' इति शब्दस्य किं तात्पर्यम् ? तत्व्युत्पत्तिव्याख्यानविषये यास्केन कीदृशमालोचनं क्रियते?
ख• उपसर्गाणामर्थाः विद्यन्ते खलु? एतद्विषये यास्ककृतनिरुक्तालोचनं विशद्यताम् ।

५• यथेच्छ**मेकस्य** निरुक्तवाक्यस्य व्याख्या करणीया (शतशब्दमध्ये उत्तरं प्रदेयम्।) -
१×६=६

क• इन्द्रियनित्यं वचनम् औदुम्बरायणः।

ख• भावप्रधानमाख्यातम्।

ग• समाम्नायः समाम्नातः स व्याख्यातव्यः।

६• यथेच्छं प्रश्न**द्वयं** संक्षेपेण समाधीयताम् (विंशतिशब्दमध्ये उत्तरं प्रदेयम्।) -
२×२=४

क• यास्कपूर्ववर्त्तिनः निरुक्तकारद्वयस्य नाम प्रदेयम्।

ख• 'चित्' इति निपातस्य कीदृशः प्रयोगः यास्कानुसारतः?

ग• 'वर्द्धते ' इति भावात् प्राक् पूर्वभावस्य किं नाम ? तद्भावस्य किं तात्पर्यम् ?

घ• 'निर्दुरित्येतयोः प्रातिलोम्यम्' इति यास्कवचनस्य कोऽर्थः ?